चरण-षष्ठम्, कार्यक्रमः- **02**

**एकसाप्ताहिक-ऑनलाइन-राष्ट्रीय सङ्कायविकासकार्यक्रमः (एफ.डी.पी.)**

# शोधाधारितकौशलसंवर्द्धनम्

**(Enhancing Research Based Skills)**

09-13 मई 2022 पर्यन्तम्

## संक्षिप्तप्रतिवेदनम्

भारतसर्वकारस्य शिक्षामंत्रालयस्य बहुआयामिपरियोजना **पण्डितमदनमोहनमालवीयराष्ट्रीयशिक्षकशिक्षणमिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय** (केन्द्रीयविश्वविद्यालयः) **शिक्षणाधिगमकेन्द्रण** षष्ठमचरणस्य **'शोधाधारितकौशलसंवर्द्धनम्'** इति विषय द्वितीय साप्ताहिक-ऑनलाइन-राष्ट्रिय सङ्कायविकासकार्यक्रमस्यायोजनं 2022 तमवर्षस्य मई मासस्य 09 तः 13 दिनाङ्कपर्यन्तं कृतम्। कार्यक्रमस्य मुख्योद्देश्यानि शोधनिमित्तं समस्याऽभिज्ञानं, शोधोद्देश्यानां शोधप्रश्नानाञ्च निर्माणक्षमतायाः विकसनम्, प्रदत्तानां संकलन प्रबंधनस्य विश्लेषणस्य च कुशलतानां निर्माणम्, विविधशोधक्रियाः विधातुं डिजिटलोपकरण एवं सॉफ्टवेयर प्रयोगक्षमतानामभिवृद्धकरणमित्यादयः आसन्। ऑनलाइनकार्यक्रमस्य सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्र शिक्षणाधिगमकेन्द्रस्य निदेशका **प्रो. अमितापाण्डेयभारद्वाज** महोदयया स्वागतभाषण कार्यक्रमस्य सन्दभाः च प्रस्तुताः। कार्यक्रमः 28 सत्रेषु सम्पन्नं तानि यथा-उद्घाटन-उद्बोधन, 14 प्रदर्शनाधारित तकनीकी सत्राणि, 05 प्रश्नोत्तर सत्राणि, 05 स्वाभ्यास सत्राणि, ऑनलाइनाकलन-प्रतिपुष्टि -अनुभवकथनसत्र समापनादीनि सत्राणि च। कार्यक्रमऽस्मिन् 66 प्रतिभागिभिः पञ्जीकरण कारितम् एवञ्च सर्वैः सफलतापूर्वक भागग्रहणं कृतम्। 66 प्रतिभागिषु 56 प्रतिभागिनः षोड्श राज्येभ्यः, 10 प्रतिभागिनः द्वि-केन्द्रशासितप्रदेशेभ्यश्च प्रतिभागं कृतवन्तः। षोड्श राज्येषु आंध्रप्रदेशतः 01, बिहारतः 02, छत्तीसगढतः 06, गुजराततः 03, हरियाणातः 02, हिमाचलप्रदेशतः 01, कर्नाटकतः 01, केरलतः 01, महाराष्ट्रतः 03, ओडिशातः 01, राजस्थानतः 11, तमिलनाडुतः 04, तेलङ्गानातः 02, उत्तराखण्डतः 06, उत्तरप्रदेशतः 10, पश्चिमबंगालतः 02 एवञ्च केन्द्रशासितप्रदेशेषु जम्मूकश्मीरतः 01 एवं देहलीतः 09 प्रतिभागिन आसन्। तकनीकीसत्राणां सञ्चालन शोधक्षेत्र निष्णातानां देशस्य प्रतिष्ठितानां संस्थानानां **त्रयोदशविशेषज्ञाना** कुशलमार्गदर्शन कृतम्। एतेषु सत्रेषु मुख्यविषयत्वेन पाठिताः अंशाः शोधसमस्यायाः स्थापनम्, शोधपरिकल्पनानां निर्माणम्, चराणमभिज्ञानं, शोधप्रश्ननिर्माणम्, गूगलप्रपत्रमाध्यमेन प्रदत्ताना संकलनं स्थापनञ्च , विविधशोधोपकरणानां प्रदत्तानां विश्लेषणं, प्लेगरिज्मसम्बन्धी उपकरणानां प्रयोगानुप्रयोगश्च, एम.एस. एक्सल माध्यमेन प्रदत्तानां व्यवस्थापन विश्लेषणञ्च, न्यादर्शचयनप्रक्रिया, परिकल्पनापरीक्षणम्, आरेखानां माध्यमेन प्रदत्तप्रस्तुतीकरणम्, ऑनलाइन अन्वेषणं सम्बद्धसाहित्याध्ययनञ्च, शोधोपकरणानां विश्वसनीयता वैधतायाः परीक्षणञ्च। प्रतिभागिनां कृते तकनीकी सत्रेषु पठितांशानामाधरेण 14 चयनाधारितानि प्रदत्तकायाणि दत्तानि। अन्ते च ऑनलाइन परीक्षणमपि कृतं यस्मिन् 72 प्रतिशतं प्रतिभागिनः 50 प्रतिशततः उपरि एव अङ्कान् प्राप्तवन्तः। अस्मिन्नेव क्रमे प्रतिभागिनां दृष्ट्या प्रदत्तानां व्याख्यानानां गुणवत्तायाः निश्चितीकरणाय विषय-विशेषज्ञानां सन्दर्भेऽपि ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकञ्च** एवं रूपेण कारितम् तथा च तेषाम् औसतम् 77%, 22%, 01% एवं 00% क्रमशः प्राप्ताः। अनेन साकं कार्यक्रमस्य सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्त। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं च**। एते 10 बिन्दनां प्राप्तश्रेण्यां औसतं प्रतिशते 75% उत्कृष्टम्, 21% अति-उत्तमम्, 03% उत्तमम्, 01% संतोषजनकम्, 00% असंतोषजनकं च प्राप्तम्। समापनसत्र निदेशकया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तत्पश्चात् **प्रो. हरिकेशसिंहमहोदयानां** (पूर्व-कुलपतिः, जयप्रकाशविश्वविद्यालयः, छपराः, बिहारः) मुख्यातिथीनां सम्बोधनम् अध्यक्षीयभाषणं माननीयानां **प्रो. मुरलीमनोहरपाठकवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि. नवदेहली) च जातम्। धन्यवादज्ञापनन शान्तिपाठेन च कार्यक्रम सम्पन्नतां गता। कार्यक्रमः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।